# संस्कृतवार्ता:

दिनाङ्क :  26/12/2024 सायम्  - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

मुख्यवार्ताः

- **प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् भारतीय-लोकतन्त्रस्य व्यापकता गुरुणां शिक्षायां, साहिबजादानां बलिदाने, देशस्य एकताया: मूलमन्त्रे च आधृता वर्तते।**
- **राष्ट्रपति द्रौपदी-मुर्मु-वर्यया वीरबालदिवसावसरे असाधारण-उपलब्धि-लब्धेभ्य: सप्तदशबालेभ्य: प्रधानमन्त्री-राष्ट्रिय-बाल-पुरस्कारा: प्रदत्ता:।**
- **निर्वाचनआयोगेन उक्तं यत् चतुश्चत्वारिंशत् तमे वर्षे लोकसभानिर्वाचने चतुः षष्टि दशांशोत्तर  चतुः षष्टि कोटिमतानां मतदानं जातम्।**
- **ऋतु-विभागेन आगामिनो: दिवसयो: वायव्य दिशि मध्य-भारते च गर्जनेन सह मन्दत: मध्यम वृष्टे: हिमवृष्टेश्च अनुमानम् प्रकटितम्।**
- **क्रिकेट्-क्रीडायां बॉर्डर्-गावास्कर-ट्रॉफी-क्रीडायाः चतुर्थ-निकषस्य प्रथमदिवसस्य क्रीडायाः समापनात् प्राक् आस्त्रेलीया देशेन षड् क्रीडकेषु एकादशाधिक त्रिशतं धावनांका: अर्जिताः।**

-----------------------------------

प्रधानमन्त्री-साहिबजादा

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् भारतीय-लोकतन्त्रस्य व्यापकता गुरूणां शिक्षायां, साहिबजादानां बलिदाने, देशस्य एकताया: मूलमन्त्रे च आधृता वर्तते। अद्य नवदिल्ल्यां भारतमण्डपम् इत्यत्र वीरबालदिवस समारोहं सम्बोधयन् प्रधानमन्त्री उक्तवान् गुरूणां परम्पराभि: वयं शिक्षिता: यत् सर्वे समानादरेण दृष्ट्या द्रष्टव्या: इति, राष्ट्रस्य संविधानमपि

अस्मान् तथैव शिक्षयति। प्रधानमन्त्री उक्तवान् यत् वीरसाहिबजादानां जीवनम् अस्मान् शिक्षयति यत् देशस्य अखण्डतया सह विचारधारया सममपि शैथिल्यताम् आनेतुं न शक्यते इति।

श्रीमोदिना उक्तं यत् देशस्य संविधानं राष्ट्रस्य संप्रभुता-एकतयो: सर्वोच्चं स्थानम् अस्ति इति शिक्षयति। प्रधानमन्त्रिणा उक्तं यत् साहिबज़ादा जोरावरसिंह: साहिबजादाफतेहसिंह श्च अतीवलघुतरौ आस्ताम्, परं तयो: वीरता आकाशादपि उन्नततमम् आसीत्।

अवसरेऽस्मिन् प्रधानमन्त्रिणा सुपोषितग्रामपञ्चायत-अभियानस्य शुभारम्भः अपि कृतः। बालानाम् पोषणं समग्रं कल्याणं च सुदृढं कर्तुं सुपोषित-ग्रामपंचायत-अभियानं प्रारब्धम्। अस्य अभियानस्य उद्देश्यं पोषणसम्बद्धसेवानां कार्यान्वयनं सुदृढं कर्तुम् अस्ति, अपि च अस्मिन् कार्ये जनानां सहभागिता सुनिश्चित्य पोषणव्यवस्थायाः सुदृढीकरणं च अस्ति। प्रायः सार्धत्रिसहस्राणि बालाः, प्रधानमन्त्रिणा राष्ट्रियबालपुरस्कारेण पुरस्कृताः बालकाः च अन्यैः गणमान्यैः जनैः सह कार्यक्रमे भागं गृहीतवन्तः।

-----------------------------------

प्रधानमन्त्री-स्वामित्व

प्रधानमन्त्रिणा नरेन्द्रमोदिना श्व: अष्टपञ्चाशत्-लक्ष-संख्यका: स्वामित्व-सम्पत्ति-चिटिका: वितरिष्यन्ते। अस्मद्वार्ताहरेण प्रोक्तं यत् अवसरेऽस्मिन् दशराज्येभ्य: द्वाभ्यां केन्द्रशासितप्रदेशाभ्याञ्च प्रायश: पञ्चाशत्सहस्र-ग्रामेषु चलचित्रीय-सम्मेलन-माध्यमेन स्वामित्व-सम्पत्ति-चिटिका: वितरिष्यन्ते।

-----------------------------------

राष्ट्रपति वीर-बाल बलिदान दिवस

राष्ट्रपति-पदासीनया द्रौपदी-मुर्मु-वर्यया वीरबालदिवसावसरे नवदिल्ल्यां असाधारण-उपलब्धि-लब्धेभ्य: सप्तदशबालेभ्य: प्रधानमन्त्री-राष्ट्रिय-बाल-पुरस्कारा: प्रदत्ता:। एतेभ्य: बालेभ्य: कलासंस्कृत्यै, वीरतायै, नवाचाराय, विज्ञान-प्रौद्योगिक्यै, सामाजिक, सेवायै, क्रीडायै, पर्यावरणस्य क्षेत्रे विशिष्ट-योगदानाय च सम्मानानि प्रदत्तानि। अवसरेऽस्मिन् राष्ट्रपतिना

साहिबजादानां वीरताबलिदाने प्रणम्य उक्तं यत् दिवसोऽयं गुरुगोविन्दसिंहस्य पुत्राणां बलिदानपराक्रमयो: सम्मानस्य वर्तते। राष्ट्रपति: पुरस्कार प्राप्तवद्भ्य: बालेभ्य: वर्धापयन्ती उक्तवती यत्-एतेषाम् उपलब्धय: देशस्य सर्वान् नागरिकान् प्रेरयिष्यन्ति।

------------------------------------

निर्वाचनआयोगेन

निर्वाचनआयोगेन उक्तं यत् चतुश्चत्वारिंशत् तमे वर्षे लोकसभानिर्वाचने चतुर् षड् दशांशोत्तर चतुः षष्टि कोटिमतानां मतदानं जातम्, महिलामतसङ्ख्या च ६५.७८ प्रतिशतं पुरुषसहभागितायाः अपेक्षया अधिकम् अभवत् । लोकसभा चतुश्चत्वारिंशत् प्रतिवेदने उक्तं यत् अस्मिन् वर्षे पञ्जीकृततृतीयलिङ्गकनिर्वाचकानां त्रयोविंशति- प्रतिशतं वृद्धिः अभवत्।

------------------------------------

उपराष्ट्रपति

उपराष्ट्रपति जगदीप धनखडः श्वः जम्मू-कश्मीरे भ्रमण करिष्यति। उपराष्ट्रपति: जम्मूस्थ श्री माता वैष्णो देवी विश्वविद्यालयस्य दशमे दीक्षांतसमारोहे मुख्य अतिथि रूपेण भागं स्वीकरिष्यति। श्री धनखड: माता वैष्णो देवी मन्दिरं भैरों बाबा मन्दिरं च द्रक्ष्यति।

------------------------------------

प्रधानमन्त्री नायर

प्रधानमन्त्री नरेन्द्रमोदी प्रख्यातस्य लेखकस्य एम.टी. वासुदेवन-नायरस्य निधने दु:खं प्रकटितवान्। एकस्मिन् जनसम्पर्क-पटले श्रीमोदी उक्तवान् यत् एम. टी. वासुदेवन नायर मलयालम् चलचित्रस्य साहित्यस्य च सर्वाधिक: सम्मानित: जन: आसीत्। तेन प्रोक्तं यत् नायरस्य कृतिषु मानवीया: भावना: सशक्तया चित्रिता: भवन्ति। तस्य लेखनी परम्परा: प्रभावितवती अग्रेऽपि प्रेरयिष्यति च। प्रधानमन्त्रिणा प्रोक्तं यत् एम. टी. वासुदेवन नायर: मौनेभ्य: वंचितेभ्य: जनेभ्य: च वाणीं प्रदत्तवान्। मोदिना दु:खस्य समये वासुदेवस्य परिजनान् प्रशंसकान् च प्रति संवेदना प्रकटिता।

-----------------------------------

<u>ऋतु:</u>

ऋतु-विभागेन आगामिनो: दिवसयो: वायव्य दिशि मध्य-भारते च गर्जेण सह मन्दत: मध्यमा वृष्टे: हिमवृष्टेश्च अनुमानम् प्रकटितम्। विभागेन प्रोक्तं यत् पश्चिमीय-विक्षोभस्य कारणात् अस्य मासस्य सप्तविंशति-अष्टविंशति निदनाङ्को: पजाब-हरियाणा-चण्डीगढ़ अवर-उत्तर प्रदेश-राजस्थान- विदर्भ-मध्य महाराष्ट्र-गुजरात-मध्य प्रदेश- स्थानेषु गर्जनेन सह हिमवृष्टि: सम्भाव्यते।

-----------------------------------

<u>सुनामी</u>

भारतं चतुरधिक- द्विसहस्रतमे वर्षे दक्षिणभारततटे आगतस्य सुनामी-त्यस्य विंशतितमे वर्षे पीडितेभ्यः भारतं श्रद्धांजलिम् अर्पयति। चतुरधिक-द्विसहस्रतमस्यवर्षस्य दिसम्बर्-मासस्य षड्विंशतिदिनाङ्के दक्षिणभारतस्य तटे आगतस्य सुनामी-प्रकोपस्य अद्य २० वर्षाणि पूर्णानि। अस्मिन् सुनामी-प्रकोपे तमिलनाडु-नगरे, पुडुचेरी-नगरे च सहस्रजनाः मृताः।

-----------------------------------

<u>क्रिकेट्-क्रीडायां</u>

क्रिकेट्-क्रीडायां मेलबर्न्-नगरे बॉर्डर्-गावास्कर-ट्रॉफी-क्रीडायाः चतुर्थ-निकषस्य प्रथमदिवसस्य क्रीडायाः समापनात् प्राक् आस्त्रेलीया देशेन षड् क्रीडकेषु एकादशाधिक त्रिशतं धावनांका: अर्जिताः।

मेलबर्न्-नगरे बॉर्डर्-गावास्कर-ट्रॉफी-क्रीडायाः चतुर्थ-टेस्ट्-क्रीडायाः प्रथमदिने आस्ट्रेलिया-देशः षड् क्रीडकेषु एकादशाधिक त्रिशतं धावनांकान् अर्जितवान्। पूर्वं आस्ट्रेलिया-देशः टॉस्-क्रीडायां विजयं प्राप्य प्रथमं दण्डक्रीडनं कर्तुं निश्चितवान्। प्रथमं वारं टेस्ट्-क्रीडां कुर्वन् सैम-कोन्स्टास्-इत्यनेन षष्टि धावनांका: अर्जिताः। उस्मान् ख्वाजा सप्तपञ्चाशत् , मानर्स् लाबुशेनः द्विसप्ततिः, स्टीव स्मिथः च अपराजितेन अष्टषष्टि धावनांकान् कृतवान् ।

इति वार्ता।